# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा, नवम्बर्-दिसम्बर्-२०१६

कक्षा – शास्त्रितृतीयवर्षम् (SEM-5) **प्रश्नपत्र-१** गुणाः - ७०

विषयः – अनिवार्यसंस्कृतम् **CF-355** समयः – 1११ तः ०२

दिनाङ्कः - २४/११/२०१६ सन्दर्भग्रन्थः – वेदान्तसारः (सदानन्दविरचितः)

---

**प्रथमान्वितिः (Unit-1)**

**प्रश्नः – १ निम्नलिखितेषु द्वयोः उत्तरं लिखत।** ०८

(१) वेदान्तसारस्य मङ्गलाचरणं विलिख्य तस्य सरलार्थं स्पष्टयत।

(२) वेदान्तरासानुसारम् अनुबन्धचतुष्टयस्य सङ्क्षेपेण वर्णनं लिखत।

(३) काम्यनिषिद्धकर्मणोः यथाग्रन्थं वर्णनं लिखत।

**प्रश्नः – २ निम्नलिखितयोः कस्यचिद् एकस्य निबन्धात्मकम् उत्तरं लिखत।** ०८

(१) वेदान्तसारानुसारम् अज्ञानं लक्षणं स्वरूपञ्च विवृणुत

(२) यथाग्रन्थं साधनचतुष्टयस्य सविस्तरं निरूपणं कुरुत

**प्रश्नः – ३ निम्नलिखितेषु द्वयोः उपरि टिप्पणीं लिखत।** ०४

(१) समष्ट्यज्ञानम्

(२) प्रायश्चित्तकर्म।

(३) अध्यारोपः।

(४) नित्यादिकर्मणां परं प्रयोजनम्

**प्रश्नः – ४ अधोलिखितेषु केषाञ्चित् पञ्चानाम् अतिलघूत्तरं लिखत।** ०५

(१) वेदान्तसारस्य कर्ता कः?

(२) वेदान्तसारस्य कर्तुः गुरोः नाम किम्?

(३) किं नाम वेदान्तः?

(४) नित्यं वस्तु किम् अस्ति?

(५) शीतोष्णादिद्वन्द्वसहिष्णुता किम् उच्यते?

(६) शारीरकसूत्राणि केन प्रणीतानि?

(७) ज्योतिष्टोमादि कीदृशं कर्म अस्ति?

**द्वितीयान्वितिः (Unit-2)**

**प्रश्नः – ५ निम्नलिखितेषु द्वयोरुत्तरं लिखत।** ०८

(१) यथाग्रन्थं सूक्ष्मशरीरस्य वर्णनं कुरुत

(२) पञ्चीकृतभूतेभ्यः कथं ब्रह्माण्डस्य उत्पत्तिर्भवतीति यथाग्रन्थं प्रतिपादयत।

(३) भारतीयदर्शनस्य विषये सङ्क्षेपेण परिचयात्मकं निबन्धं लिखत।

**प्रश्नः – ६ निम्नलिखितयोः कस्यचिद् एकस्य निबन्धात्मकम् उत्तरं लिखत।** ०८

(१) वेदान्तसारानुसारं पञ्चीकरणप्रक्रियां लिखत

(२) वेदान्तदर्शनरीत्या सृष्टेः उत्पत्तिं विशदयत

**प्रश्नः – ७ निम्नलिखितयोः एकस्य उपरि लघुटिप्पणीं लिख्यताम्।** ०२

(१) आवरणशक्तिः।

(२) विक्षेपशक्तिः।

**प्रश्नः – ८ अधोनिर्दिष्टेषु कयोश्चिद् द्वयोः अतिलघूत्तरं यच्छत।** ०२

(१) का नाम बुद्धिः?

(२) कानि ज्ञानेन्द्रियाणि?

(३) कानि कर्मेन्द्रियाणि?

(४) के पञ्च प्राणाः?

## तृतीयान्वितिः (Unit-3)

**प्रश्नः – ९ निम्नलिखितेषु द्वयोः उत्तरं दीयताम्** ०८

(१) आत्मस्वरूपविषये अतिप्राकृतानां जनानां मतम् उपस्थापयत।

(२) परिणामविवर्तयोः भेदं स्पष्टयत।

(३) "तत्त्वमसि" इति महावाक्यस्य ग्रन्थोक्तदिशा अर्थं स्पष्टयत।

**प्रश्नः – १० निम्नलिखितयोः कस्यचिद् एकस्य निबन्धात्मकम् उत्तरं लिखत।** ०८

(१) जीवात्मस्वरूपविषये वेदान्तदर्शनस्य मतं स्पष्टयत।

(२) जीवात्मस्वरूपविषये चार्वाकदर्शनस्य मतं ग्रन्थोक्तदिशा स्पष्टयत।

**प्रश्नः – ११ निम्नलिखितेषु द्वयोः उत्तरं दीयताम्** ०४

(१) जहल्लक्षणा।

(२) अजहल्लक्षणा।

(३) जहदजहल्लक्षणा।

(४) तुरीयं चैतन्यम्

**प्रश्नः – १२ अधोनिर्दिष्टेषु पञ्चानाम् अतिलघूत्तरं यच्छत** ०५

(१) किं नाम श्रवणम्?

(२) किं नाम अभ्यासः?

(३) समाधिः कतिविधः? किं तत्?

(४) योगस्य कति अङ्गानि? नामानि लिखत।

(५) कति यमाः? के ते?

(६) कस्य प्राणाः अत्रैव समवलीयन्ते?

(७) रेचकः कुम्भकः इत्यादि कस्य प्रकाराः?

***